Roll No……………………….

Signature of Invigilator ………

Paper Code

BV-203

# पतंजलि विश्वविद्यालय

## University of Patanjali
## Examination June-2022
### बी. ए. व्याकरण, द्वितीयसत्रम्
### व्याकरणम्, तृतीयपत्रम्
### संस्कृतसाहित्यम्

समयः - होरात्रयम् पूर्णाङ्काः 70

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

### (खण्ड -क)

**पृष्टेषु पञ्चसु त्रयः प्रश्नाः समाधेयाः।** ( 15 x3 =45)

1. (क) उरुभङ्गमाश्रित्य श्रीकृष्णस्य चरित्रचित्रणं कुर्वन्तु।
   (ख) महाकविभासस्य परिचयं ददतु।

2. अथ कोऽयं नाम रसः? रसभेदाः लिखित्वा रसभेदस्य कानिचिद् त्रीणि उदाहरणानि वर्णयन्तु।

3. (क) शुकनासोपदेशस्य कवेः परिचयं लिखन्तु।

   (ख) गद्यव्याख्यानं कुरु -
   सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति, जनं गुणवन्तमपवित्रमिव न स्पृशति, उदारसत्त्वममङ्गलमिव न बहु मन्यते। सुजनमनिमित्तमिव न पश्यति। अभिजातमहिमिव लङ्घयति। शूरं कण्टकमिव परिहरति। दातारं दुःस्वप्नमिव न स्मरति। विनीतं पातकिनमिव नोपसर्पति। मनस्विनमुन्मत्तमिवोपहसति। परस्परविरुद्धं चेन्द्रजालमिव प्रकटयति जगति निजं चरितम्।

4. उरुभङ्गंनाटकस्य अंकसारं दुर्योधनस्य च चरित्रचित्रणं लिखत।

5. ध्वन्यादिभेदेन काव्यस्य कति भेदाः सन्ति तथा च ध्वनिकाव्यस्य सोदाहरणं व्याख्यानं कुरुत।

## (खण्ड -ख)

**पृष्टेषु अष्टसु पञ्च प्रश्नाः समाधेयाः।** ( 5 x5 =25)

6. श्लोकस्य व्याख्या करणीया -

भीष्मद्रोणतटां जयद्रथजलां गान्धारराजह्रदां,

कर्णद्रौणिकृपोर्मिनक्रमकरां दुर्योधनस्रोतसम्।

तीर्णः शत्रुनदी शरासिसिकतां येन प्लवेनार्जुनः,

शत्रूणां तरणेषु तः स भगवानस्तु प्लवः केशवः।।

7. सद्वृत्तंशब्दस्य कोऽभिप्रायः? आयुर्वेदेऽस्य का महिमा?

8. शुकनासोपदेशस्य कानिचिद् पञ्च सुभाषितानि लिखत।

9. मानसिकं सद्वृत्तं वर्णयन्तु।

10. चित्रकाव्यस्य व्याख्या करणीया।

11. आहारसम्बन्धी हवनसम्बन्धी च सद्वृत्तं वर्णयन्तु।

12. श्लोकयोः व्याख्यां कुर्वन्तु -

1. भीमेन भित्त्वा समयव्यवस्थां गदाभिघातक्षतजर्जरोरुः।
   भूमौ भुजाभ्यां परिकृष्यमाणं स्वं देहमर्धोपरतं वहामि।।
2. प्रतिज्ञावसिते भीमे गते भ्रातृशते दिवम्।
   मयि चैवं गते राम! विग्रहः किं करिष्यति।।

13. श्लोकयोः व्याख्यां कुरुत -

1. नृलोकमापूरयते यशसा साधुसम्मतः।
   धर्मार्थाविति भूतानां बन्धुतामुपगच्छति।।
2. स्वस्थवृत्तं यथोदिष्टं यः सम्यगनुतिष्ठति।
   स समाः शतमत्याधिरायुषा न वियुज्यते।।

---------------x---------------